# सप्त श्लोकी

यदा सृष्टं जगत्सर्वं तदा लोकपिता महः ।
चतुर्वेद समायुक्तं शाश्वतं धर्ममादिशत् ॥१॥
किं सत्कर्म किमध्यात्मं यदि विज्ञातुमर्हति ।
सर्व शास्त्रेषु ग्रंथेषु प्रमाणं परमं श्रुतिः ॥२॥
अस्पष्टं च कदा स्पष्टं तत्त्वज्ञान विवेचनम् ।
अन्यत्र लभ्यते किंतु प्रमाणं परमं श्रुतिः ॥३॥
आर्ष ग्रंथेषु सर्वेषु श्रुति प्रामाण्य मेव च ।
सर्वतः सारमादद्यान्निजकल्याण हेतवे ॥४॥
शुष्कवादरताः केचिन्नान्यदस्तीतिवादिनः ।
सर्वे ते विलयं यान्ति मिथ्याकलहकारिणः ॥५॥
नास्तिका वेदनिन्दकाः पाखण्डा वेददूषकाः ।
एते सर्वे विनश्यन्ति मिथ्याचार प्रवर्तकाः ॥६॥
यज्ञ दान तपः कर्म स्वाध्याय निरतो भवेत् ।
एष एव हि श्रुत्युक्तः सत्यधर्मः सनातनः ॥७॥

एष आदेशः

एष उपदेशः

एतद् अनुशासनम्

एवम् अनुशासितव्यम्

एवम् उपासितव्यम्

# धर्मं चर

यज्ञ धर्मं चरामि
दान धर्मं चरामि
तपो धर्मं चरामि
कर्म धर्मं चरामि
स्वाध्याय धर्मं चरामि

पुनरपि यज्ञ धर्मं चरामि
पुनरपि दान धर्मं चरामि
पुनरपि तपो धर्मं चरामि
पुनरपि कर्म धर्मं चरामि
पुनरपि स्वाध्याय धर्मं चरामि

पुनः पुनरपि यज्ञ धर्मं चरामि
पुनः पुनरपि दान धर्मं चरामि
पुनः पुनरपि तपो धर्मं चरामि
पुनः पुनरपि कर्म धर्मं चरामि
पुनः पुनरपि स्वाध्याय धर्मं चरामि

# त्रिसत्य शरणागति

सत्यं शरणं गच्छामि
सत्यधर्मं शरणं गच्छामि
सत्यधर्मसङ्घं शरणं गच्छामि (३ वेळा)